सद्याह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥”
इति मन्त्रेण दद्यात् १४। प्रोक्षितनानाविध-नैवेद्योपरि मत्स्यमुद्रया मूलं दशधा जप्त्वा-भ्यर्च्य धेनुमुद्रयामृतीकृत्य।
“ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम्।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥”
इति मन्त्रेण दद्यात् १५। जलमादाय।
“ॐ समस्तदेवदेवेश सर्व्वतृप्तिकरं परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ॥”
इति मन्त्रेण दद्यात् १५। पूर्व्ववत् पुनराच-मनीयञ्च। ताम्बूलं गृहीत्वा।
“ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम्।
कल्पयामि तवेशान वदनाम्भोजभूषणम् ॥”
इति मन्त्रेण दद्यात् १५। ततस्तद्देवतानमस्कारमन्त्रैर्वन्दनं कुर्य्यात्। १६। उपचारद्रव्याधारदाने साधारणेनोल्लेखः पृथग्वा तद्दानम्।*। तत ॐ विष्णवे नमः इति त्रिः संपूज्य घण्टावितानतोरणयुक्तं वस्त्रादिच्छादितं वेश्म प्रोक्ष्य ॐ विष्णवे नमः इति त्रिः संपूज्य ॐ तद्विष्णोरित्यनेन विष्णुं स्तुत्वा ॐ तत् सदित्युच्चार्य्य वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वकामः श्रीविष्णुप्रीतिकामो वा एतत्तृणकाष्ठादिमयवेश्म विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृजेत्। इष्टकादिमये तु एतदिष्टकादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रद्विगुणकालावच्छिन्नस्वर्गलोकमहितत्वकाम एतदिष्टकादीतिविशेषः। एतत्प्रतिष्ठार्थं सुवर्णं तन्मूल्यं वा दक्षिणां विष्णवे दद्यात्। पश्चादाचार्य्यादौ प्रतिपत्तिः।*। ततो देवं स्वयं गृहीत्वा गृहप्रदक्षिणं कारयित्वा ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। इत्यनेनाभिमन्त्रितं देवं गृहं प्रवेशयेत्। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमाददे इति मन्त्रेण पिण्डिकोपरि न्यसेत्। ॐ स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्व्वन् पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः। इत्यनेन स्थिरीकुर्य्यात्। पुनर्देवं संपूज्य यथाशक्ति चामरघण्टावितानगोहिरण्यग्रामवाद्यभाण्डादिकं दद्यात्। तत ॐ यावद्धराधरो देवो यावत्तिष्ठति मेदिनी। तावदत्र जगन्नाथ सन्निधीभव केशव॥ इति मन्त्रं पठेत्। ततो ध्वजसमीपं गत्वा संप्रोक्ष्य तमारोपयेदनेन मन्त्रेण ॐ एह्येहि भगवन्नीश्वरविनिर्म्मित उपरिचरवायुमार्गानुसारिन् श्रीकर श्रीनिवास रिपुध्वंसकर सुजनाधिलय सर्व्वदेवतासम्मत कुरु शान्तिं स्वस्त्ययनञ्च मे भवतु सर्व्वविघ्नान् हर हर स्वाहा ॐ ध्वजाय नम इति ध्वजं संपूज्य ॐ विष्णवे नम इति त्रिरभ्यर्च्य ध्वजं संप्रोक्ष्य वामहस्तेन स्पृष्ट्वा अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा महापातकादिबहुपापक्षयकामो विष्णुप्रीतिकामो वा विष्णुवेश्मनि इमं ध्वजं विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृज्य एतत्प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात्। पश्चादाचार्य्यादौ प्रतिपत्तिः। ततो गरुड़स्तम्भं समारोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम सामते तनुर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वःपत। यजुर्वेदी तु। ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्णियाः शफाः यजूंषि नाम। सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत इति पठित्वा। ॐ गरुड़ाय नम इति त्रिःसंपूज्य ॐ नमस्ते पतगश्रेष्ठ पन्नगान्तकर प्रभो। त्वत्प्रसादाच्छवाहो मोऽयं दिवि देववत्॥ यथा त्वं संपुटकरः सततं नतकन्धरः। तथैव पुरतो विष्णोस्त्वत्प्रसादाद्भवाम्यहम्॥ इति पुटाञ्जलिः प्रार्थयेत्॥*॥ ततः पिष्टप्रदीपादिना निर्म्मञ्छनं कुर्य्यात्। ततो विंशत्यून-ब्राह्मणेभ्यो भोज्यानि दद्यात्। दीनानाथकृपणबधिरेभ्यो यथाशक्ति दद्यात्। ततः प्रीयतां पुण्डरीकाक्षसर्व्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥ ततो नृत्यगीतवादित्रनिस्वनमहोत्सवं कृत्वा अच्छिद्रावधारणं कृत्वा वैगुण्यसमाधानार्थं तद्विष्णोरिति विष्णुं स्मरेत्।*। एवं वृद्धादिमठादिप्रतिष्ठायां आसनादिकन्तु तत्तन्मन्त्रं विहाय केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा यथायोग्यं तत्तत्कर्म्मशेषं समापयेत्।*। एवं गोपथादि प्रतिष्ठायां तत्समीपे वेदिकां कृत्वा तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्प्रतिष्ठां करिष्ये इति सङ्कल्प्य हविश्राद्धादिकं विधाय प्रागुक्तविधिनाधिस्थापनादि एतत्कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां दद्यात्।*। नियमव्रतादिप्रतिष्ठायान्तु विष्णुरित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणादिकं कुर्य्यात्।*। ततो घटस्थजलेन यजमानमभिषिञ्चेत्। तद्यथा,—
“ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते॥
आखण्डलोऽग्निर्भगवान् यमो वै नैरृतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिश्च मातरः।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च॥
औषधानि विचित्राणि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतास्त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये ॥”*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम्॥

(पक्वखाद्यवस्तुविशेषः। अस्य पाकप्रकारो यथा,
“समिता मर्द्दयेदाज्यजलेनापि च सन्नयेत्।
तस्यास्तु वटिकां कृत्वा पचेत् सर्पिषि नीरसम्॥
एला लवङ्गकर्पूरमरीचाद्यैरलङ्कृते।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत्॥
अयम्प्रकारः संसिद्धो मठ इत्यभिधीयते ॥”
[सन्नयेन्मर्द्दयेत्] तथास्य गुणाः॥
“मठस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मठरः, पुं, (मन्यते मनुतेऽवबुध्यते इत्यर्थः। मन + “वचिमनिभ्यां चिच्च।” उणा० ५। ३८। इति अरचित् ठश्चान्तादेशः।) मुनिविशेषः। इत्युणादिकोषः॥ (शौण्डः। मठरो मुनिशौण्डयोरित्युज्ज्वलदत्तः॥)

मठ इ क मोदे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ मण्ठयति। इति दुर्गादासः॥

मड इ कि भूषे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) मण्डयति मण्डति नारी जनम्। इ मण्ड्यते। इति दुर्गादासः॥

मड इ ङ विभागे। वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मण्डते इ मण्डते। इति दुर्गादासः॥

मड़कः, पु, (मण्डयति भूषयति क्षेत्रमिति। मड़ि + “कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।” उणा० २। ३२। इति कुन्। पृषोदरादित्वान्नलोपः।) शस्यभेदः। मेड़ुया इति भाषा। इति जटाधरः॥

मड्डुः, पुं, वाद्यविशेषः। इत्यमरः। १। ७। ८॥ मुडूक इति ख्यातः। विपुलो डमरुर्मड्डुरिति कोषः। मद् इति रौति इति मड्डुः पूर्व्वपदादीतेर्डु मनीषादित्वाद्दकारस्य डत्वम्। मज्जन्ति शब्दा अत्रेति मज्जेर्निपातो वा। इति भरतः॥

मड्डुकः, पुं, (मड्डुरेवेति मड्डु + स्वार्थे कन्।) मड्डुवाद्यम्। इति त्रिकाण्डशेषः॥

मण कूजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मणति। कूजोऽव्यक्तशब्दः। इति दुर्गादासः॥

मणिः, पुं, स्त्री, (मण + “सर्व्वधातुभ्य इन्।” उणा० ४। ११७। इतीन्।) अश्मजातिः।